**SYLLABUS FOR M.A. SANSKRIT SPECIAL VYAKARANA**

**IN AFFILIATED COLLEGES**

**2019 ADMISSION ONWARDS**

**M.A. SANSKRIT SPECIAL VYAKARANA COURSE STRUCTURE AND MARK DISTRIBUTION**

## Preface

सर्वेषां शास्त्राणां सम्यक् ज्ञानार्थं व्याकरणशास्त्रज्ञानम् अनुपेक्षणीयमेव। "काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्" इत्युक्तिः। वेदार्थानुशीलने वेदसंरक्षणे च शिक्षा, कल्पः, निरुक्तम्, व्याकरणम्, छन्दः, ज्योतिषञ्चेति वेदानां षडङ्गानि सन्ति। तेषु अङ्गेषु असाधुशब्देभ्यः साधुशब्दानां विवेकाय प्रवृत्तं व्याकरणं नामाङ्गं नितान्तमेव महनीयं श्रेष्ठञ्च वर्तते। तस्मात् वेदस्य मुखस्थानत्वं व्याकरणस्य कल्पितम्। व्याकरणशास्त्रं नितरां प्राचीनमस्ति।

इदानीम् उपलभ्यमानेषु लौकिकवैदिकव्याकरणग्रन्थेषु पाणिनीयव्याकरणं प्रथमस्थानमावहति। संस्कृतभाषायां पाणिनीयव्याकरणस्य अतिप्राधान्यं सर्वेषु शास्त्रेषु अङ्गीक्रियते। अष्टाध्यायी लौकिकवैदिकभाषासम्बन्धी विशिष्टग्रन्थः भवति।

महाभाष्यादयः अष्टाध्यायीव्याख्यानग्रन्थाः इतरशास्त्रेषु मध्ये अस्य शास्त्रस्य प्राधान्यं उत्घोषयन्ति। व्याकरणशास्त्रस्य दार्शनिकत्वं वाक्यपदीयग्रन्थेन भर्तृहरिणा प्रपञ्चितम्। अपि च बहवः अपाणिनीयग्रन्थाः शास्त्रेऽस्मिन् उपलब्धाः। तादृशानां व्याकरणविषयाणां सामान्यपरिचायाय विशेषविषयावगमनाय गूढार्थचिन्तनाय च इयं पाठ्यपद्धतिः पण्डितैः साकं समालोच्य विरचितम्।